M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 767

Title: Madhya Siddhanta Kaumudi

767

मध्यसिद्धांत कौमुदी.

Madhya Sidhanta Kaumudi	Title
Varadarāja	Author
	Editor
Sam. 1694	Year, Vols.
	Publisher
767	Remarks

सह. डितिनिर्देशात्पूर्वनिपातः इवेनवासमासोविभक्त्यलोपश्च वागर्थौइव वागर्थाविव
इतिकेवलसमासः अव्ययीभावः अधिकारोयंप्राक्तत्पुरुषात् अव्यय
प विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्यायौ
गपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु विभक्त्यर्थादिषुवर्त्तमानमव्ययंसुबंतेनसह
नित्यंसमस्यते प्रायेणाविग्रहोनित्यसमासः अस्वपदविग्रहोवा विभक्तौ हरिङि
अधिस्इति प्रथमानिर्दिष्टंसमासउपसर्जनं समासशास्त्रेप्रथमादिनिर्दिष्टंउपस विधाय ६
र्जनं उपसर्जनंपूर्वं समासेउपसर्जनंप्राक्प्रयोज्यं इत्यधःप्राक्प्रयोगः सुपोलुक्
एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायांसुपोधात्विति अव्ययीभावश्चेत्यव्यय
त्वात्सुपोलुक् अधिहरि अव्ययीभावश्च नपुंसकं गोःपातीतिगोपाः तस्मिन्नधिगो
पं नाव्ययीभावादतोम्त्वपंचम्याः अदंतादव्ययीभावात्सुपोनलुक्तस्यपंचमींविना
अमादेशः कृष्णस्यसमीपंउपकृष्णं तृतीयासप्तम्योर्बहुलं अदंतादव्ययीभावात्तृ

म० स० तृतीयासप्तम्योर्बहुलमव्ययीभावः उपकूलं उपकूलेन उपकूले बहुलग्रहणात्क्वचि अव्य०
दुन्मत्तगंगमित्यादि सप्तम्यां नित्यमव्ययीभावः मद्राणां समृद्धिः सुमद्रं यवनानां
ऋद्धिर्दुर्यवनं मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययो ऽतिहिमं निद्रा संप्रति
न युज्यत अतिनिद्रं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनुविष्णु योग्यतावी
प्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः रूपस्य योग्यमनुरूपं अर्थमर्थं प्रतिप्रत्य
र्थं शक्तिमनतिक्रम्य इति यथाशक्ति अव्ययीभावे चाकाले सहस्य सः स्यादव्ययीभा
वे न तु काले हरेः सादृश्यं सहरि काले तु सहपूर्वाह्णं ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं
चक्रेण युगपत्सचक्रं सदृशः सख्या ससखि यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्र
हणं गुणभूते सादृश्ये यथा स्यादित्येवमर्थं क्षत्राणां संपत्तिः सक्षत्रं तृणमप्यपरि
त्यज्य सतृणं अग्निग्रंथपर्यंतमधीते साग्नि यथा सादृश्ये असादृश्य एव य
थाशब्दः समस्यते तेनेह न यथा हरिस्तथा हरः यावदवधारणे यावंतः श्लोकास्ता

वंतो ऽच्युतप्रणामा यावच्छ्लोकं सूपप्रतीति मात्रार्थे शाकस्य लेशः शाकप्रति विभाषा
अपपरिबहिरंचवः पंचम्या अपविष्णोः संसारः अपविष्णुसंसारः परिविष्णुसंसारः
परिविष्णोः संसारः बहिर्वनं बहिर्वनात् प्राग्वनं प्राग्वनात् तिष्ठद्गुप्रभृतीनि च ए
तानि निपात्यंते तिष्ठंति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः पारेमध्ये षष्ठ्या वा
पारमध्यशब्दौ षष्ठ्यंतेन सह वा समस्येते एदंतत्वं चानयोर्निपात्यते पारेगंगं गं
गापारं मध्येगंगं गंगामध्यं महाविकल्पेन वाक्यमपि संख्या वंश्येन वंशो द्विधा
विद्यया जन्मना च तत्र भवो वंश्यः तद्वाचिना सह संख्या वा समस्यते द्वौ मुनी वंश्यौ
द्वि द्विमुनि व्याकरणस्य त्रिमुनि विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकरणं ए
कविंशति भारद्वाजं नदीभिश्च नदीभिः संख्या सह वा समस्यते समाहारे चायमिष्य
ते पंचगंगं द्वियमुनं अन्यपदार्थे च संज्ञायां अन्यपदार्थे पदं विद्यमानं सुबंतं न
दीभिः सह नित्यं समस्यते विभाषाधिकारे ऽपि वाक्येन संज्ञानवगमादिह नित्यसमासः

शरदःसपीपउप केवल
शरद२

मध्य०स०
८

उन्मत्तगंगं नामदेशः लोहितगंगं [illegible]ताः आपंचमपरिसमाप्तेरधिकारोयं
अव्ययीभावे शरत्प्रभृतिभ्यः शरदादिभ्यष्टच् स्यात्समासांतो व्ययीभावे शरदः
पाशुपानहनोमनोहिमवच्चतुर् दिग्दृशविशश्चेतोनडुहाय यत्तसद्विकियद्रूपाः
जरायाजरश्च उपजरसं अनश्च अन्नंताद्व्ययीभावाट्टच्चा [illegible]
[illegible]वे नस्तद्धिते नांतस्य भस्य टेर्लोपः स्तद्धिते उपराजं अध्यात्मं नपुंसकाद
न्यतरस्यां अन्नंतं यत्क्लीबं तदंताद्व्ययीभावाट्टच् वा उपचर्म उपचर्मं झयः
झयंताद्व्ययीभावाट्टज्वा उपसमित् उपसमिधं नदीपौर्णमास्याग्रहायणीभ्यः
टज्वा उपनदं उपनदि गिरेश्च सेनकस्य टज्वा उपगिरं उपगिरि प्रतिपरसमनु
भ्योक्ष्णः इ प्रसक्षमित्यादि अक्ष्णः परं परोक्षं अत एवसमासः परोक्षेलिडिति
निपातनात्परस्यौकारः इत्यादि श्रीः छः इत्यव्ययीभावः छः श्रीः
तत्पुरुषः अधिकारोयं प्राग्बहुव्रीहेः तत्पुरुषः तत्पुरुषसंज्ञः स्यात् द्वितीयाश्रि
तातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः सह वास
उपपौर्णमासं उपपौर्णमासि उपाग्रहायणं उपाग्रहायणि ५

कृष्णश्रितः

मस्यात् कृष्णंश्रितः दुःखातीतः गम्यादीनामुपसंख्यानं ग्रामंगमी ग्रामगमी अन्नं
बुभुक्षुः स्वयंक्तेन द्वितीयेति नसंबध्यते अयोग्यत्वात् स्वयंकृतस्योपसंख्यायं कृ
तिः तृतीया तत्कृतार्थेन गुणवचनेन तृतीयांतं तृतीयांतार्थकृतगुणवचनेनार्थशब्दे
न च सह प्राग्वत् शंकुलया खंडः शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृतेति किं
अक्ष्णा काणः पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः तृतीयांतमेतैः प्राग्वत्
मासपूर्वः मातृसदृशः पितृसमः ऊनार्थः माषोनं कार्षापणं माषविकलं वाक्
कलहः आचारनिपुणः गुडमिश्रः आचारश्लक्ष्णः अवरस्योपसंख्यानं मासावरः
अन्नेन व्यंजनं संस्कारद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत् दध्ना उपसिक्तो ओ
दनः दध्योदनः भक्ष्येण मिश्रीकरणं गुडेन मिश्रा धाना गुडधानाः कर्तृकरणे कृ
ता बहुलं कर्तरि करणे च तृतीया बहुलं प्राग्वत् हरिणा त्रातः हरित्रातः नखभिन्नः कृद्ग्रह
णे गतिकारक पूर्वस्यापि ग्रहणं नखनिर्भिन्नः कृता किं काष्ठैः पचतितरां चतु
र्थी तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यंतार्थाय यत्तद्वाचिनार्थादिभिश्च

चतुर्थ्यंतं वा प्राग्वत् यूपाय दारु यूपदारु तदर्थेन प्रकृतिविकारभाव एवेष्टिः ते
म० स० नेह न रंधनाय स्थाली अश्वघासादयस्तु षष्ठीतत्पुरुषः अर्थेन नित्यसमासो विशे
९ ष्यलिंगता चेति वक्तव्यं द्विजायायं द्विजार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूत
बलिः गोहितं गोसुखं गोरक्षितं पंचमी भयेन चोराद्भयं चोरभयं स्तोकांतिकदूरार्थ
कृच्छ्राणि क्तेन पंचम्याः स्तोकादिभ्यः अलुगुत्तरपदे स्तोकान्मुक्तः अल्पान्मुक्तः अंति
दा अभ्याशागतः कादागतः दूरादागतः [redacted] कृच्छ्रादागतः षष्ठी सुबंतेन प्राग्वत् राज्ञः
पुरुषो राजपुरुषः याजकादिभिश्च षष्ठ्यंतं समस्यते वक्ष्यमाणनिषेधस्यापवादः
ब्राह्मणयाजकः देवपूजकः माजकपूजकपरिचारकपरिवेषकस्नापकाध्याप
कोत्सादको होतृ भर्तृ रथगणकपतिगणकानि गुणात्तरेण तरलोप
श्च तरबंतं यद्गुणवाचि तेन समासः सर्वेषां श्वेततरः सर्वश्वेतः सर्वेषां महत्तरः
सर्वमहान् क्वचिन्न षष्ठी समस्यत इति वाच्यं बुधाश्रयस्य नः नान्निर्धारणे षष्ठी न ९
समस्यते नृणां द्विजः श्रेष्ठः प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं सर्पिषो ज्ञाने
ना

१ कर्तरि किं इक्षूणां भक्षणा भिक्षुभक्षिका पत्यर्थभर्तृशब्दस्य याजकादित्वात् समासः भूभर्ता कथं तर्हि घटानां निर्मातुस्त्रिभुवन
विधातुश्च कलह इति शेषषष्ठ्या समास इति कैयटः १०४
पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन पूरणाद्यर्थैः सदादिभि
श्च षष्ठी न समस्यते सतां षष्ठः काकस्य कार्ष्ण्यं फलानां सुहितः तृप्त्यर्थाः फ
लानां सुहितः सन् द्विजस्य कुर्वन् कुर्वाणो वा ब्राह्मणस्य कृत्वा पूर्वेत्तिर
साहचर्यात् कृदव्ययमेव गृह्यते तेन तदुपरीत्यादि सिद्धं ब्राह्मणस्य कर्तव्यं त
क्षकस्य सर्पस्य क्तेन च पूजायां मतिबुद्धिसूत्रेण विहितो यः क्तस्तदंतेन
षष्ठी न समस्यते राज्ञां मतः बुद्धः पूजितो वा अधिकरणवाचिना च क्तेन
षष्ठी न समस्यते इदमेषामासितं गतं भुक्तं वा कर्मणि च उभयप्राप्तौ कर्म
णीति या षष्ठी सा न समस्यते आश्चर्यो गवां दोहो अगोपेन १०५ तृजका
भ्यां कर्तरि कर्त्रीस १०४ र्थतृजकाभ्यां षष्ठ्या न समासः वज्रस्य भर्ता ओद
नस्य पाचकः कर्मणि च कर्तरि षष्ठ्या अ[illegible]न समासः भवतः शायिका केन
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे अवयविना सह पूर्वादयः सम
स्यंते एकत्वविशिष्टश्चेदवयवी षष्ठीसमासापवादः पूर्वं कायस्य पूर्व

×सर्वोप्येकदेशाह्ना समस्यते संख्याविसायेति रूपकाल् मध्याह्नः सायाह्नः × तत्पुरुषः

मध्य॰स १० न कायः। अपरकायः एकाधिकरणे किं पूर्वंछात्राणां अर्द्धंनपुंसकं समांश एकदेशिनाकिं पूर्वनाभिकायस्य
वाच्यर्द्धशब्दो नित्यं क्लीबे सहप्राग्वत् अर्द्धंपिप्पल्याः अर्द्धपिप्पली एकविभक्त्या
वषष्ठ्यंतवचनामिस्रुपसर्जनसंज्ञाभावात् ह्रस्वो न क्लीबे किं ग्रामार्द्धः द्रव्यैकत्वएव
अर्द्धपिप्पलीनां द्विती यतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतान्येकदेशिना
सहप्राग्वत् द्वितीयंभिक्षायाः द्वितीयभिक्षा एकदेशिकिंनां द्वितीयंभिक्षा
याभिक्षुकस्य अन्यतरस्यांग्रहण सामर्थ्यात्पूरणगुणेति निषेधं बाधित्वा पक्षे
षष्ठीसमासः भिक्षाद्वितीयं प्राप्तापन्ने च द्वितीयया पक्षे द्वितीयासमासः
प्राप्तोजीवनं प्राप्तजीवनः जीवनप्राप्तः आपन्नजीवनः जीवनापन्नः इहस
त्रे द्वितीययाऽइति स्त्वित्वाअकारोपि विधीयते तेन जीविकां प्राप्ता ८स्त्री प्राप्तजीवि
का आप॰अ× न्नजीविका सप्तमीशौंडैः सप्तम्यंतं शौंडादिभिः प्राग्वत् अक्षे
षुशौंडो अक्षशौंडः शौंडधूर्तकितवव्याधप्रवीणसंवीतांतराधीताः पटुपंडित ११
कुशलचपल निपुणानीति शौंडादिः द्वितीयात्तृतीया इत्यादियोगविभागादन्य

काकाः परिमाणिना परिच्छेद्यवाचिनास्रुवं तेन काकाः समस्यंते मासोजातोयस्यसमासजातः ३

त्रापिद्वितीयादिविभक्तीनां प्रयोगवशात्समासोज्ञेयः दिक्संख्येसंज्ञायां विशे
ण षणंविशेष्येणबहुलमित्येवसिद्धे संज्ञायामेवेतिनियमार्थंसूत्रं पूर्वेषुकामशमी॥
सप्तर्षयः नेह उत्तरा वृक्षाः पंचब्राह्मणाः तद्धितार्थोत्तरपदसमाहारेच तद्धि
तार्थे विषयउत्तरपदे च परतः समाहारे च वाच्येदिक्संख्येप्राग्वत् पूर्वस्यांशालायां
भवः पूर्वशाला इति समासे जाते सर्वनाम्नो वृत्तिमात्रे पूर्वस्य पुंवद्भावः दिक्पू
र्वपदादसंज्ञायां ञः अस्माद्भवार्थे ञो संज्ञायां तद्धितेष्वचामादेः ञितिणिति
च तद्धिते अचामादेरचोवृद्धिः यस्येति च पौर्वशालः पूर्वशालाप्रियायस्येति
त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः तेन शालाशब्द आ
कार उदात्तः पूर्वशालाप्रियः दिक्समाहारो नास्ति अनभिधानात् षण्णां
मातॄणां अपत्यं षाण्मातुरः मातुरुत्संख्यासंभद्रपूर्वायाः इति वक्ष्यमाणोण् पंचगा
वोधनं यस्येति त्रिपदे बहुव्रीहौ द्वंद्वतत्पुरुषयोः उत्तरपदे नित्यसमास

इकारे तद्धिते च परे भस्य इवर्णावर्णयोर्लोपः स्यात् ५

मध्य॰स॰ वचनं गोरतद्धितलुकि गोंतात्तत्पुरुषाट्टच् समासांतोन तु तद्धितलुकि पंचगवधनं
११ संख्यापूर्वोद्विगुः द्विगुरेकवचनं द्विग्वर्थः समाहार एकवत् स नपुंसकं समाहा
रेद्विगुर्द्वंद्वश्च नपुंसकं पंचानां गवां समाहारः पंचगवं विशेषणं विशेष्येण बहुलं
भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् नीलमुत्पलं नीलोत्पलं बहुल
ग्रहणात् क्वचिन्नित्यं कृष्णसर्पः क्वचिन्न रामो जामदग्न्यः अपरस्यार्द्धे पश्चभावो
श्च वक्तव्यः अपरश्चासावर्द्धः पश्चार्द्धः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सह सम
स्यंते सद्वैद्यः आन्महतः समानाधिकरणजातीययोः महावैयाकरणः तत्पुरुषः
समानाधिकरणः कर्मधारयः पुंवत्कर्मधारयजातीयदेशीयेषु कर्मधारयजा
तीयदेशीययोश्च परतो भाषितपुंस्कात् परऊङभावो यस्मिन् तथाभूतं पूर्वं पुंवत्
पुस्क्णी प्रियादिषु प्राप्तः पुंवद्भावो नेति विधीयते महानवमी कृष्णचतुर्दशी
महाप्रिया पूज्यमानैः किं उद्धृतो गौः पंकादुद्धृत इत्यर्थः उपमानानि सामा ११
न्यवचनैः घन इव श्यामः घनश्यामः शाकपार्थिवादीनामुत्तरपदलोपश्च शाक

प्रियः पार्थिवः शाकपार्थिवः देवब्राह्मणः मयूरव्यंसकादयश्च एते निपात्यंते मयूरो व्यंस
कः मयूरव्यंसकः व्यंसको धूर्तः उदक्चावाक्च उच्चावचं निश्चितं च प्रचितं च निश्च
तिङंतं तिङं तेनाक्रियाः॰ प्रचं नास्ति किंचन यस्य सोऽकिंचनः आख्यातमाख्यातेन क्रियासातत्ये अश्नीतपि
बतीत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता पचतभृज्जता खादतमोदता ना
नास्ति कुतोभयं यस्य स अकुतोभयः अन्यो राजा राजांतरं चिदेव चिन्मात्रं नञ् स्पा
प्राग्वत् नलोपो नञः नञो नस्य लोप उत्तरपदे अब्राह्मणः तस्मान्नुडचि लुप्तनका
रान्नञ उत्तरपदस्याजादेर्नुट् अनश्वः नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समा
सः कुगतिप्रादयः एते समर्थेन सह समस्यंते कुत्सितः पुरुषः कुपुरुषः ऊर्यादिच्विडाच
श्च ऊर्यादयश्च्व्यंता डाजंताश्च क्रियायोगे गतिसंज्ञाः स्युः ऊरीकृत्य उररीकृत्य शु
क्लीकृत्य पटपटाकृत्य कारिकाशब्दस्योपसंख्यानं कारिका क्रिया कारिकाकृत्य
अनुकरणं चानितिपरं खाट्कृत्य अनितिपरं किं खाडिति कृत्वा निरष्ठीवत् आद
रानादरयोः सदसती सत्कृत्य असत्कृत्य भूषणेऽलं अलंकृत्य भूषणे किं अलंकृ

समासेनञ्पूर्वेक्त्वो ल्यप् अव्ययपूर्वपदेनञ्समासे क्त्वो ल्यबादेशः

म०स० त्वौदनं गतः पर्याप्तमित्यर्थः अनुकरणमित्यादि सूत्री स्वभावात् कृञ्विषया अं त्रि
तरपरिग्रहे अंतर्हत्य मध्ये हत्वेत्यर्थः अपरिग्रहे किं अंतर्हत्वा गतः हतं परिग्रह्य
१२ इ गतैत्यर्थः कणेमनसी श्रद्धाप्रतीघाते कणेहत्य पयः पिबति मनोहत्य कणेशब्दः
सप्तमीप्रतिरूपको निपातो भिलाषातिशये वर्त्तते मनस्शब्दोप्यत्रैव पुरोव्ययं
पुरस्कृत्य अस्तंच अस्तमिति मांतमव्ययं गतिसंज्ञं अस्तंगत्य अच्छगत्यर्थवदे
षु अव्ययमित्येव अच्छगत्य अच्छोद्य अभिमुखं गत्वा उक्त्वा चेत्यर्थः अव्ययं किं
जलमच्छं गच्छति अदोनुपदेशे अदःकृत्य अदःकृतं परप्रत्यक्षपदेशेभ्रस्कदाहरणं
तिरोंतर्द्धौ तिरोभूय विभाषाकृञि तिरःकृत्य तिरस्कृत्वा तिरस्कृत्वा तिरस्कृ
त्य उपाजेन्वाजे एतौ कृञि वा गतिसंज्ञौ स्तः उपाजेकृत्य अन्वाजेकृत्य उ
पाजेकृत्वा अन्वाजेकृत्वा दुर्बलस्य बलमाधायेत्यर्थः साक्षात्प्रभृतीनि च कृञि
वागतिसंज्ञास्युः च्व्यर्थ इति वक्तव्यं साक्षात्कृत्य साक्षात्कृत्वा लवणंकृत्य लव १२
ना णंकृत्वा मांतत्वं निपातनात् अनत्याधान उरसिमनसी उरसिकृत्य उरसिकृत्वा वास्याऽ

परेकृत्य परेकृत्वा ३

अंगीकारः अभ्युपगम्येत्यर्थः मनसिकृत्य मनसिकृत्वा निश्चित्येत्यर्थः अत्याधानमुपश्लेषः
षणं तत्र न उरसिकृत्वा पाणिं शेते मध्येपदेनिवचने च एते कृञि वा गतिसंज्ञास्युः रस्था न
धाने मध्येकृत्य मध्येकृत्वा निवचनेकृत्य निवचनेकृत्वा वाचंनियम्येत्यर्थः नित्यं हस्ते
पाणावुपयमने कृञि उपयमनं विवाहः स्वीकारमात्रमित्यन्ये हस्तेकृत्य प्राध्वं बंधने
प्राध्वमित्यव्ययं प्राध्वंकृत्य बंधनेनानुकूलं कृत्वेत्यर्थः प्रार्थनादिना त्वनुकूलकरणे
प्राध्वंकृत्वा जीविकोपनिषदावौपम्ये जीविकामिव कृत्वा जीविकाकृत्य उपनिषत्कृ
त्य औपम्ये किं जीविकांकृत्वा प्रादिग्रहणमगत्यर्थं कुगतिप्रादयः प्रादयो गताद्यर्थे प्रथ
मया प्रगतः आचार्यः प्राचार्यः अत्यादयः क्रांताद्यर्थे द्वितीयया अतिक्रांतो मालामिति
विग्रहे एकविभक्ति चापूर्वनिपाते विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं न तु तस्य पूर्व
निपातः गोस्त्रियोरुपसर्जनस्य उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययांतं च तदंतस्य प्राति
पदिकस्य ह्रस्वः अतिमालः अवादयः क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया
अवकोकिलः पर्यादयो ग्लानाद्यर्थे चतुर्थ्या परिग्लानोध्ययनाय पर्यध्ययनः निरा

तत्पु०

कालसमयवेलासु तुमुन्॥

दृषः क्रांता घर्षयेपंरस्था निःक्रांतः कौशांब्याः निःकौशांबिः ॥ तत्रोपपदं सप्तमीस्थं उपपदम
म०५५० तिङ् उपपदं समर्थेन नित्यं समस्यते अतिङंतश्चायं समासः कुंभकरोतीति कुंभकारः अतिङ्
२२ किं भाषमवानहृत् माङि लुङीति सप्तमीनिर्देशान्माङुपपदं गतिकारकोपपदानां कृद्भिः सह स
मासवचनं प्राक्सुबुत्पत्तेः व्याघ्री अश्वक्रीतीकच्छपीत्यादि अमेवाव्ययेन अमेव तुल्यविधा
नं यदुपपदं तदेवाव्ययेन समस्यते स्वादुंकारं नेह ॥ कालसमयवेलावाभोक्तुं अमैवेति किं
अग्रेभोजं अग्रेभुक्त्वा विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ अमाचान्येन तुल्यविधान
मेतत् तृतीयाप्रभृतीन्यन्यतरस्यां उपदंशस्तृतीयायामिति णमुल् तृतीयायामित्य
तीन्युपपदान्यमंतेनाव्ययेन सहवा समस्यते मूलकेनोपदंशंभुंक्ते मूलकोपदंशं क्त्वा तृ
तीयाप्रभृतीन्युपपदानि क्त्वांतेन सहवा समस्यते उच्चैःकृत्य उच्चैःकृत्वा तत्पुरुषस्यांगुलेः
संख्याव्ययादेः संख्याव्ययादेरंगुल्यंतात्तत्पुरुषाट्टच् द्वे अंगुली प्रमाणमस्य द्व्यंगुलं निरंगुलमु
लं अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः एभ्योरात्रेरच् स्यात् चात्संख्याव्ययादेः अहर्ग्रहणं २२
द्वंद्वार्थं रात्राह्नाहाः पुंसि एते पुंस्येव अहश्च रात्रिश्चाहोरात्रः सर्वरात्रः पूर्वरात्रः सं
ख्यातरात्रः पुण्यरात्रः संख्यापूर्वं रात्रं क्लीबं द्विरात्रं अतिरात्रः राजाहःसखिभ्यष्टच् एतद
निर्गतमंगुलीभ्यो

कर्मप्रवचनीयानां प्रतिषेधः कृत्संज्ञा

अप्राणिषु किं वानरश्वेव वानरश्वा उत्तरमृगपूर्वाच्च सक्थ्नः वा उपमानात् उत्तरसक्थं

तात्तत्पुरुषाट्टच् परमराजः कृष्णसखः अक्ष्णोऽखोरेव टिलोपः नान्यत्र उत्तमाहः अह्नो
ह्न एतेभ्यः सर्वादिभ्यो हन्नादस्यान्हादेशः समासांतेपरे अह्नोदंतात् अदंतपूर्वपदस्थानि
मित्तात्परस्याह्नोनस्यणः सर्वाह्णः नसंख्यादेः समाहारे अह्नाह्नादेशोन द्व्यहः त्र्यहः
उत्तमैकाभ्यां च उत्तमशब्दोंत्यार्थः पुण्यशब्दमाह पुण्यसुदिनाभ्यामह्नः क्लीबते
ह्ना पुण्याहं सुदिनाहं एकाहः अग्राख्यायामुरसः टच् अश्वानामुर इवाश्वोरसं मुख्या
साधारणइत्यर्थः श्च इत्यर्थः ग्रामकौटाभ्यां च तक्ष्णः ग्रामतक्षः कौटतक्षः अतेःशुनः अतिश्वो वराहः
उपमानादप्राणिषु अप्राणिविषयकोपमानवाचिनःशुनष्टच् आकर्षःश्वेवाकर्षश्वः
सक्थं पूर्वसक्थं फलकमिव सक्थि फलकसक्थं नावो द्विगोः द्विनावं त्रिनावं अर्धा
न्नावः अर्धं अर्धनावं खार्याः प्राचां द्विगोरर्धाच्च खार्याः टच्वा द्विखारं अर्धखारं अर्द्ध
द्विखारि॥ अर्धखार्यादः खारि द्वित्रिभ्यामंजलेः द्व्यंजलं द्व्यंजलि ब्रह्मणो जानपदाख्यायां ब्रह्मांतात्तत्पुरुषाट्टच् सु
राष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः कुमहद्भ्यामन्यतरस्यां कुब्रह्मः [illegible] महाब्रह्मः महाब्रह्मा आ
न्महतेदत्वाल्नमहाराजः प्रकारवचने जातीयर् महाप्रकारो महाजातीयः [illegible]
नौशब्दाद्विगोष्टच् स्यान्न तु तद्धितलुकि॥

कुधांसनःकौटः स्वतंत्रः सशासीत ...
समासेनजानपदमाख्यायते चेत् ३
कुब्रह्मा
महा

म०सं० द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः आत्स्यात् द्वौ च दश च अधिका दशेति वा द्वादश
१५ अष्टादश अबहुव्रीह्यशीत्योः किं द्वित्राः द्व्यशीतिः प्राक्शतादित्युक्तेर्नेह द्विशतं त्रयस्त्रयः
त्रिशब्दस्य त्रयस् आदेशः पूर्वविषये त्रयोदश त्रयोविंशतिः विभाषा चत्वारिंशत्प्रभृतौ सर्वे
षां द्व्यष्टनस्त्रेश्च प्रागुक्तं वा स्यात् चत्वारिंशदादौ परे द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टा
चत्वारिंशत् अष्टचत्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवं पंचाशत् षष्टिसप्त
तिनवतिषु। परवल्लिंगं द्वंद्वतत्पुरुषयोः कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ अर्द्ध
पिप्पली द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न पंचकपालः पुरोडाशः प्राप्तोजीविकां
प्राप्तजीविकः अलंकुमार्यै अलंकुमारिः अतएव ज्ञापकात्समासः तत्पुरुषः निष्कौशां
बिः पूर्ववदश्ववडवौ द्विवचनं तत्र अश्ववडवौ अश्ववडवान् अपथं नपुंसकं तत्पुरुष
इत्येव अन्यत्र अपथो देशः कृतसमासांतग्रहणान्नेह अपंथाः अकारांतोत्तरपदो
द्विगुः स्त्रियामिष्टः पंचपूली आबंतो वा पंचखट्वं पंचखट्वी पात्राद्यंतस्य न पंचपात्रं ग्रं
त्रिभुवनं चतुर्युगं छाया बाहुल्ये छाया तत्पुरुषो नपुंसकं पूर्वपदार्थबाहुल्ये इक्षु २४
णां छाया इक्षुच्छायं सभा राजामनुष्यपूर्वा राजपर्यायपूर्वः अमनुष्यपूर्वश्च सभांत

स्तत्पुरुषो नपुंसकं स्यात् इनसभं ईश्वरसभं अमनुष्यशब्दो रूढ्या रक्षःपिशाचादी
नाह रक्षःसभं पिशाचसभं विभाषा सेनासुराच्छायाशालानिशानां एतदंतस्तत्पुरु
षः क्लीबं वा स्यात् ब्राह्मणसेनं ब्राह्मणसेनेत्यादि अशाला च संघातार्था या सभा
तदंतस्तत्पुरुषः क्लीबं स्यात् स्त्रीसभं स्त्रीसंघात इत्यर्थः अशाला किं धर्मसभा धर्मशाला
इत्यर्थः अर्द्धर्चाः पुंसि च अर्द्धर्चादयः पुंसि क्लीबे च स्युः अर्द्धर्चं अर्द्धर्चः एवं ध्वजती
र्थशरीरमंडपयूपदेहांकुशकलशसूत्रपात्रादयः सामान्ये नपुंसकं मृदु पचति प्रा
तः कमनीयं इति मध्यकौमुद्यां तत्पुरुषसमासः समाप्तः श्रीः श्रीः
शेषो बहुव्रीहिः अधिकारोऽयं प्राग्द्वंद्वात् अनेकमन्यपदार्थे अनेकं प्रथमांतमन्यपदा
र्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः सप्तमीविशेषणे बहुव्रीहौ सप्तम्यंतं विशेषणं
च बहुव्रीहौ पूर्वं स्यात् हलदंतात्सप्तम्याः संज्ञायां हलंतादंदंताच्च सप्तम्या अलुक् कंठेकालः
अतएव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः प्राप्तमुदकं यं प्राप्तोदको ग्रामः ऊढरथो
नड्वान् उपहृतपशू रुद्रः उद्धृतौदना स्थाली पीतांबरो हरिः वीरपुरुषको ग्रामः

मध्य॰स॰ प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः प्रपतितपर्णः प्रपर्णः नञोऽस्त्यर्थानां वाच्यो वाचोत्तरप
१५ दलोपः अविद्यमानपुत्रोऽपुत्रः स्त्रियाःपुंवद्भाषितपुंस्कादनूङ् समानाधिकरणेस्त्रि
याम पूरणीप्रियादिषु उक्तपुंस्कादनूङ् अभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य
पुंवाचकस्येव रूपंस्यात्समानाधिकरणेनतु पूरण्यां प्रियादौच गोस्त्रियोरितिह्रस्वः
चित्रगुः रूपवद्भार्यः अनूङ् किं वामोरूभार्यः पूरण्यांतु अप्पूरणीप्रमाण्योः पूर
णार्थप्रत्ययांतं यत्स्त्रीलिंगं तदंतात्प्रमाण्यंताच्च बहुव्रीहेरप् कल्याणीपंचमीया
सां रात्रीणां ताः कल्याणीपंचमा रात्रयः स्त्रीप्रमाणीयस्य सः स्त्रीप्रमाणः पुंवद्भावनि
२ षेधोऽप्रत्ययश्च प्रधानपूरण्यामेव रात्रिः पूरणीवाच्या वेत्युक्तोदाहरणे मुख्या
इति प्रासे ... अन्यत्रतु नद्यृतश्च नद्युत्तरपदाद्दंतोत्तरपदाद्बहुव्री
हेः कप् पुंवद्भावः केणः ह्रस्वः कल्याणपंचमीकःपक्षः अत्र तिरोहितावयव
भेदस्यापक्षस्यान्यपदार्थतया रात्रिप्रधानं बहुकर्तृकः अप्रियादिषु किं कल्या
णीप्रियः प्रियामनोज्ञा कल्याणी स्कभगादुर्भगाभक्तिः सचिवास्वसाकांताक्षांता। १५

इति प्रासे नकपि ह्रस्वः २

ठक्छिन्नेतद्धितेभस्य पुंवद्भावः ५

समाचपला दुहिता वामा वला तनया सामान्येन नपुंसकं दृढभक्तिर्यस्य दृढभक्तिः
स्त्रीत्वविवक्षायां तु दृढाभक्तिः तसिलादिकृत्वोऽर्थपर्यन्तेषु परिगणनं कर्तव्यं अव्याप्त्य
तिव्याप्तिपरिहारार्थं तत्र तसो तरप्तमपौ चरड्जातीयरौ कल्पदेशीयरौ
रूपप्पाशपौ थाल्तिल्थ्यनौ एषु परेषु स्त्रियाः पुंवत् बह्वीषु बहुत्र बहुतः इत्यादि
त्वतलोर्गुणवचनस्य शुक्लायाः भावः शुक्लत्वं शुक्लता भस्याढेतद्धिते हस्तिनी
नां समूहो हास्तिकं अढे किं रौहिणेयः कुक्कुट्यादीनामंडादिषु कुक्कुटांडं मृगपदं
मृगक्षीरं काकशावः क्यङ्मानिनोश्च पुंवत् एनीवाचरति एतायते श्येनीवाचर
ति श्येनायते स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानिनी नकोपधायाः स्त्रि
याः न पुंवत् पाचिकाभार्यः रसिकाभार्यः मद्रिकायते मद्रिकामानिनी कोपधप्र
२ तिषेधे तद्धितवुग्रहणं नेह पाकभार्यः संज्ञापूरण्योश्च न पुंवत् दत्ताभार्यः पंच
मीभार्यः वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे वृद्धिशब्देन विहिताया वृद्धिस्त

म॰ स॰ ड् तुर्यस्याश्छितो ऽ रक्तविकारार्थस्यदंतास्त्री नपुंवत् स्रौघ्नीभार्यः माथुरीयते
१६ माथुरीमानिनी रक्तेतु काषायकंथः विकारे तु हैमीमुद्रिकायस्य हैममुद्रिकः स्वा
गांतः स्वांगाद्य ईकारस्यदंतास्त्री नपुंवत् सुकेशीभार्यः स्वांगात्किं पटुभार्यः ईतः
ति किं अकेशभार्यः अमानिनीवक्तव्यं सुकेशमानिनी जातेश्च नपुंवत् शूद्राभा
र्यः संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये संख्येयार्थसंख्ययाव्ययादयस्स
मस्यंते स बहुव्रीहिः बहुव्रीहौसंख्येये डजबहुगणात् संख्येये यो बहुव्रीहिस्तस्मा
द्डस्समासांतः दशानां समीपे ये संति ते उपदशाः अबहुगणात्किं उपबहवः उ
उपगणाः अत्रस्वरे विशेषः तिविंशतेर्डिति विंशतेर्भस्य तिशब्दस्य लोपो डिति प
रे आसन्नविंशाः अदूरत्रिंशाः अधिकचत्वारिंशाः । द्वौ वा त्रयो वा द्वित्राः दिङ्ना
मान्यंतराले दिशोनामान्यंतराले प्राग्वत् दक्षिणस्याः पूर्वस्याश्च दिशो अंतरालं १६
दक्षिणपूर्वा तत्र तेनेदमिति सरूपे सप्तम्यंते ग्रहणविषये सरूपपदे तृतीयांतेन

नामग्रहणाद्यौगिकानांन ऐंद्र्याश्च कौबेर्याश्चांतराले॰

प्रहरणविषये इदं युद्धमित्यर्थे समस्यते कर्मव्यतिहारे अन्येषामपिदृश्यते इति
कर्मव्यतिहारबहुव्रीहौ पूर्वपदस्य दीर्घः केशाकेशि ग्रहीत्वा इदं युद्धं प्रवृत्तं केशाके
शि दंडैश्च दंडैश्च प्रहृत्येदं युद्धं प्रवृत्तं दंडादंडि मुष्टीमुष्टि तेनसहेति तुल्ययोगे
तुल्ययोगे वर्त्तमानं सहेत्येतत्तृतीयांतेन प्राग्वत् वोपसर्जनस्य बहुव्रीहेरवयव
स्य सहस्य सो वा पुत्रेण सह सपुत्रः सहपुत्रो वा आगतः प्रकृत्याशिषि सहशब्दः
स्वस्तिराज्ञे सहपुत्राय सहामात्याय अगोवत्सहलेष्विति वक्तव्यं सगवे सवत्सा
य सहलाय बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच् स्वांगवाचिसक्थ्यक्ष्णांतात् बहु व्यस्ययेनषष्ठी
व्रीहेः षच् दीर्घसक्थः जलजाक्षी स्वांगात्किं दीर्घसक्थि शकटं स्थूलाक्ष
वेणुर्यष्टिः अक्ष्णोऽदर्शनादितिवक्ष्यमाणात् द्वित्रिभ्यांषमूर्ध्नः द्विमूर्द्धः त्रिमूर्द्धः
अंतर्बहिर्भ्यां च लोम्नः अप् अंतर्लोमः बहिर्लोमः पादस्य लोपो हस्त्यादिभ्यः ह
स्त्यादिवर्जितादुपमानात्परस्य पादस्य लोपः व्याघ्रस्येव पादावस्य व्याघ्रपात्

वकु॰

मध्य॰स अहस्त्यादिभ्यः किं हस्तिपादः कुसूलपादः संख्यासुपूर्वस्य पादस्य लोपः
१७ द्विपात् सुपात् उद्विभ्यां काकुदस्य उत्काकुत् विकाकुत् पूर्णाद्विभाषा
पूर्णकाकुत् पूर्णकाकुदः सुहृ[illegible] दुर्हृदौ मित्रामित्रयोः सुदुर्भ्यां हृदय
स्य हृद्भावो निपात्यते सुहृन्मित्रं दुर्हृदमित्रं नेतुर्नक्षत्रे ऽब्वक्तव्यः मृगो नेता
त्र यासां रात्रीणां ताः मृगनेत्रा रात्रयः पुष्यनेत्राः अञ्नासिकायाः संज्ञायां नसं चास्थू
लात् नासिकान्ताद्बहुव्रीहेरच् नासिकाशब्दश्च नसं प्राप्नोति पूर्वपदात्संज्ञायामगः
पूर्वपदस्थान्निमित्तात्परस्य नस्य णः संज्ञायां न तु गकारव्यवधाने द्रुरिव नासिका द्रु॰
४द्रु यस्य द्रुणसः खुरखराभ्यां वा नस् खुरणाः खरणाः पक्षेऽजपीष्यते खुरणसः खरण
सः उपसर्गाच्च उन्नसः वेर्ग्रो वक्तव्यः विगता नासिका यस्य विग्रः ख्यश्च विख्यः शिव
नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां अच् अहलः अहलिः असक्थः असक्थिः १७
एवं दुःसुभ्यां शक्त्योरिति पाठान्तरं अशक्तः अशक्तिः नित्यमसिच् प्रजामेधयोः

प्रादेर्यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासिकाया नसादेशश्च ३

नञ्दुःसुभ्य एव अप्रजाः दुःप्रजाः सुप्रजाः अमेधाः दुर्मेधाः सुमेधाः धर्मादनिच् केव
लात् केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् कल्याणधर्मा केवलात्किं प
रमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् इच् कर्मव्यतिहारे केशाकेशि मुसला
मुसलि प्रसंभ्यां जानुनोर्ज्ञुः प्रज्ञुः संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वज्ञुः ऊर्ध्वजानुः धनुष
श्च धनुरन्तस्य बहुव्रीहेरनङादेशः शार्ङ्गधन्वा वा संज्ञायां शतधन्वा शतधनुः
जायाया निङ् जायान्तस्य बहुव्रीहेर्निङादेशः लोपो व्योर्वलि युवति[illegible] ज्याया य
स्य युवजानिः गंधस्येदुत्पूतिसुसुरभिभ्यः उद्गंधिः पूतिगंधिः सुगंधिः सुरभिगंधिः
उपमानाच्च पद्मस्येव गंधोऽस्य पद्मगंधिः वयसि दंतस्य दतृ संख्यासुपूर्वस्यैव द्वि स्य
दन् चतुर्दन् सुदन् अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च वा स्यात् कुड्मलाग्रदन्तः
कुड्मलाग्रदन् उरःप्रभृतिभ्यः कप् व्यूढोरस्कः प्रियसर्पिष्कः अर्थान्नञः अनर्थकः
नञः किं अपार्थं इनः स्त्रियां इनन्ताद्बहुव्रीहेः कप् बहुदंडिका नगरी अनिनास्मि

गंधस्येत्वे तदेकान्तग्रहणं एकान्तं एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः सुगंधि पुष्पं सलिलं च सुगंधिर्वायुः ४

बहुव्रीहि॰

मध्य॰स ग्रहणान्यर्थवत्ताच्चानर्थके न तु तदंतविधिं प्रयोजयंतीति वचनात् बहुवाग्मिका नगरी
१८ शेषाद्विभाषा अनुक्तसमासांताद् बहुव्रीहेः कप् वा बहुमालकः बहुमालो वा महायशाः
महायशस्कः अनुक्तेत्यादि किं व्याघ्रपात् आपोन्यतरस्यां कपि ह्रस्वः बहुमालाकः न बहुमालकः
संज्ञायां शेषादिति प्राप्तः कप् न विश्वेदेवा अस्य विश्वदेवः ईयसश्च ईयसोन्तरपदा
त्कप् न बहवः श्रेयांसो यस्य स बहुश्रेयान् गोस्त्रियोरिति ह्रस्वे प्राप्ते ईयसो बहुव्री
हेर्नेति वाच्यं बहवः श्रेयस्यो यस्य स बहुश्रेयसी बहुव्रीहेः किं अतिश्रेयसि
र्वंदिते भ्रातुः पूजार्थं भ्रात्रं तान्न कप् प्रशस्तो भ्राता यस्य प्रशस्तभ्राता वंदिते किं मू
र्खभ्रातृकः सर्वनामसंख्ययोर्बहुव्रीहावुपसंख्यानं पूर्वनिपातः सर्वश्वेतः त्रिशुक्लः
संख्याया अल्पीयस्याः द्वित्राः द्वंद्वे च द्वादश वा प्रियस्य प्रियगुडः गुडप्रियः गड्वा
देः परा सप्तमी गडुकंठः क्वचिन्न वहेगडुः निष्ठा निष्ठांतं बहुव्रीहौ पूर्वं कृतकृत्यः
जातिकालसुखादिभ्यः परा निष्ठा वाच्या सारंगजग्धी मासजाता वाहिताग्न्यादिषु आ
हिताग्निः अग्न्याहितः आकृतिगणोयं ॐ इति मध्य॰बहुव्रीहिः श्रीः १८

ईश्वरं गुरुं च भजस्व भिक्षामट गां चानयेत्यनयोः ५

श्रीः चार्थे द्वंद्वः अनेकं सुबंतं चार्थे वर्त्तमानं वा समस्यते स द्वंद्वः समुच्चयान्वाचयेतरे
तरयोगसमाहाराश्चार्थाः तत्रेश्वरं गुरुं च भजस्वेति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्न
न्वयः समुच्चयः भिक्षामट गां चानयेति अन्यतरस्यानुषंगिकत्वेनान्वाचयः धवख
दिरौ छिंधीति मीलितान्वय इतरेतरयोगः संज्ञापरिभाषमिति समूहः समाहारः
समुच्चयान्वा अनयोरसामर्थ्यात्समासोपि न राजदंतादिषु परं एषु पूर्वप्रयोगार्हं परं स्यात् दंता
चययोः५ नां राजा इति राजदंतः धर्मादिष्वनियमः अर्थधर्मौ धर्मार्थौ दंपती जंपती जाया
भा पती जायाया जंभावो दंभावश्च निपात्यते आकृतिगणोयं द्वंद्वे घि पूर्वं हरिहरौ
अजाद्यदंतं ईशकृष्णौ अल्पाच्तरं शिवकेशवौ ऋतुभानां समाक्षराणामानुपू
र्व्येण हेमंतशिशिरवसंताः कृत्तिकारोहिण्यौ समाक्षराणां किं ग्रीष्मवसंतौ लघ्वक्ष
रं पूर्वं कुशकाशं अभ्यर्हितं च तापसपर्वतौ वर्णानामानुपूर्व्येण ब्रह्मक्षत्रियविट्
श्रेष्ठ शूद्राः भ्रातुर्ज्यायसः युधिष्ठिरार्जुनौ द्वंद्वश्च प्राणितूर्यसेनांगानां एषां द्वंद्व एकवत्
प्राणिपादं मार्दंगिकपाणविकं रथिकाश्वारोहं अध्ययनतोविप्रकृष्टाख्यानां

×उध्यश्चइरावतीच उध्येरावती गंगाशोणं कुरुक्षेत्रकुरुक्षेत्रं कुरुकुरुक्षेत्रं द्वंद्व॰

मध्य॰ स॰ अध्ययनेनप्रत्यासन्ना आख्यायेषां द्वंद्वएकवत् पदकक्रमकं जातिरप्राणिनां
२९ प्राणिवर्जं जातिवाचिनां द्वंद्वएकवत् धानाशष्कुलि प्राणिनां तु विरूप्यशः विशिष्ट
लिंगोनदीदेशोग्रामाः ग्रामवर्जं नदीदेशवाचिनां भिन्नलिंगानां द्वंद्वएकवत् यूका
लिक्षं आनकुलात्क्षुद्रजंतवः येषां चविरोधः शाश्वतिकः प्राग्वत् अहिनकुलं
गोव्याघ्रं काकोलूकमित्यादौ परत्वाद्विभाषावृक्षेति प्राप्तं चकारेण बाध्यते शू
द्राणामनिरवसितानां अबहिष्कृतानां शूद्राणां द्वंद्वएकवत् तक्षायस्कारं पा
त्राद्बहिष्कृतानां तु चंडालमृतपाः गवाश्वप्रभृतीनिच यथोच्चारितानि साधूनि
दासीदासं इत्यादि गवाश्वं विभाषावृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्व
वडवपूर्वापराधरोत्तराणां वृक्षादीनां सप्तानां द्वंद्व अश्ववडवेति द्वंद्वत्रयं तत्रा
ग्वत् वृक्षादौ विशेषाणामेवग्रहणं प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः रुरुपृषतं
रुरुपृषताः कुशकाशं कुशकाशाः व्रीहियवं व्रीहियवाः दधिघृतं दधिघृते
गोमहिषं गोमहिषाः शुकबकं शुकबकाः अश्ववडवं अश्ववडवाः पूर्वापरं पूर्वा

...द्वंद्वं तं ... सर्वो द्वंद्व एकवत् २९

पूरे अधरोत्तरं अधरोत्तरे फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां
बहुप्रकृतिरेव द्वंद्व एकवदितिवाच्यं बदराणिचामलकानि च बदरामलकं नेह बदरामलके
रथिकाश्वारोहावित्यादि नदधिपयआदीनि एकवत्स्युः दधिपयसी इध्माबर्हिषी निपा
तनाद्दीर्घः ऋक्सामे वाङ्मनसे आनङृतो द्वंद्वे विद्यायोनिसंबंधवाचिनामृदंतानां द्वंद्वे
ग्र आनङुत्तरपदे होतापोतारौ होतृपोतृनेष्टोद्गातारः मातापितरौ पुत्रेऽन्यतरस्यां पिता
पुत्रौ देवताद्वंद्वे च इहोत्तरपदे आनङ् मित्रावरुणौ वायोःप्रयोगे प्रतिषेधः अग्निवायू
वाय्वग्नी ईदग्नेः सोमवरुणयोः देवताद्वंद्वे इत्येव अग्नेस्स्तुत्स्तोमसोमाः अग्नेः परे
षामेषां सस्य षः समासे अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नीवरुणौ इद्वृद्धौ
वृद्धिमत्युत्तरपदे अग्नेरिदादेशो देवताद्वंद्वे अग्नीमरुतौ देवताऽस्य आग्निमारुतं
कर्म अग्नीवरुणौ देवताऽस्य आग्निवारुणं कर्म देवताद्वंद्वे चेत्युभयपदवृद्धिः विष्णोर्न ५८
आग्नावैष्णवं दिवोद्यावा देवताद्वंद्वे उत्तरपदे द्यावाभूमी मातरपितरावुदीचां
उदीचां किं मातापितरौ द्वंद्वाच्चुदषहांतात्समाहारे चवर्गांताद्दषहांताच्च द्वंद्वात्

समरूप०

मध्य०स० समाहा रे वाक्त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं
२० छत्रोपा नहं समाहारे किं प्राहृट्शरदौ इति द्वं
द्वन्द्वसमासः श्रीः मा छः अथैकशेषः
विरूपाणा मपि समर्थानां वक्रदंडश्च कुटिलदंडश्च वक्र
द्वंडौ कु टिलदंडौ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः
पूनासहो क्तौ गोत्रं शिष्यते गोत्रप्रत्ययमात्रकृतं चेत्तयोः
क्तस्तं वैरू प्यं स्यात् गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वृद्धः
किं गर्गगा र्ग्यायणौ यूना किं गर्गगार्ग्यौ तल्लक्षणः किं गार्ग्यव
त्स्यायनौ स्त्रीपुंवच्च यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थ
श्च पुंवत् गार्गी च गार्ग्यायणश्च गार्ग्यौ पुमान् स्त्रिया सहोक्तौ शिष्यते तल्लक्षण एव चेद्विशेष
श्चेत् हंसश्च हंसी च हंसौ भ्रातृपुत्रौ स्वसृदुहितृभ्यां भ्राता च स्वसा च भ्रातरौ
पुत्रश्च दुहिता च पुत्रौ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां अक्लीबेन सहोक्तौ २०
स्या

१ सरूपाणामेकशेष एकविभक्तौ · रामौ · रामाः

क्लीबं शिष्यते तच्च वा एकवत् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं
वस्त्रं तदिदं शुक्लं तानि मानि शुक्लानि पिता मात्रा मात्रा सहोक्तौ पिता वा शिष्यते
माता च पिता च पितरौ श्वशुरः श्वश्र्वा सहोक्तौ वा शिष्यते श्वशुरश्च श्वश्रूश्च श्वशु श्र
रौ त्यदादीनि सर्वैर्नित्यं सर्वैः सहोक्तौ त्यदादीनि शिष्यंते स च देवदत्तश्च तौ त्यदा
दीनां मिथः सहोक्तौ यत्परं तच्छिष्यते स च यश्च यौ पूर्वशेषोपि दृश्यते इति भाष्यं
स च यश्च तौ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि सा च देवदत्तश्च तौ तच्च
देवदत्तश्च यज्ञदत्तश्च तानि ग्राम्यपशुसंघेष्वतरुणेषु स्त्री एषु सहविवक्षायां स्त्री
शिष्यते गाव इमाः ग्राम्येति किं रुरव इमे पशुग्रहणं किं ब्राह्मणाः संघातेषु किं एतौ गा
वौ अतरुणेषु किं वत्सा इमे अनेकशफेष्विति वाच्यं अश्वा इमे इत्येकशेषः
श्रीः ऋक्पूरब्धूःपथामानक्षे ऋगाद्यंतस्य समासस्य अप्रत्ययोंतावयवोऽक्षे
ब०धू० याधूस्तदंतस्य न अर्द्धर्चः अनृचबह्वृचावध्येतर्येव नेह अनृक्साम बह्वृक्सूक्तं क

अनुसामं अनुलोमं अवसामं ३ समासां० तत्प्रत्यय०

मध्य०स० विष्णुपुरं विमलापंसरः अंतरुपसर्गेभ्योपईत् द्वीपं अंतरीपं समीपं अवर्णांताद्वा
२१ प्रेपं प्रापं उदनोदेशे अनूपोदेशः राजधुरा अक्षेतु अक्षधूः दृढधूः रथः सखि
पथः सम्यक्पथोदेशः अच्प्रत्यन्ववपूर्वात्सामलोम्नः प्रतिसामं प्रतिलोमं अवलोमं
कृष्णोदक्पांडुसंख्यापूर्वायाभूमेरजिष्यते कृष्णभूमः पांडुभूमः द्विभूमः त्रिभूमः प्रा उदक्भूमः
सादः संख्यायानदीगोदावरीभ्यांच पंचनदं सप्तगोदावरं अजितियोगविभागादन्य म:४
त्रापि पद्मनाभः अक्ष्णोदर्शनात् अवाक्षः पर्यायादृक्ष्णोऽन्यात् गवामक्षीवगवाक्षः
स्त्रचतुर अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवप
दष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजु
षजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः अजंताःपंचविंशतिर्निपात्यंते च्युपाभ्यां
चतुरोऽजिष्यते त्रिचतुराः चतुर्णां समीपे उपचतुराः ब्रह्महस्तिभ्यांवर्चसः ब्रह्मवर्चसं राजवर्चसं
हस्तिवर्चसं पल्यराजभ्यांचेतिवक्तव्यं पल्यवर्चसं अवसमंधेभ्यस्तमसः अ २१
अंधतमसं वतमसं संतमसं अन्ववतप्ताद्रहसः अनुरहसं अवरहसं तप्तरहसं प्रतेरुरसः

सप्तमीस्थात् उरसासिप्रत्युरसं अनुगवमायामे एतन्निपात्यतेदीर्घत्वे अनुग
वंयानं यस्यायाम इतिसमासः उपसर्गादध्वनः प्रगतोध्वानं प्राध्वोरथः नपूजना
त् पूजनार्थात्परेभ्यःसमासांतानस्युः सुराजा अतिराजा स्वतिभ्यामेव नेह
परमराजः किमःक्षेपे कुत्सितोराजाकिंराजा किंसखा किंगौः नञस्तत्पुरुषात्
अराजा तत्पुरुषात्किं अधुरंशकटं पथोविभाषा अपथं अपंथाः तत्पुरुषा
दित्येव अपथोदेशः श्रीः इतिसमासांताः श्रीः श्रीः
अलुगुत्तरपदे इत्यधिकृत्य ओजःसहोंभस्तमसस्तृतीयायाः ओजसाकृत
मित्यादि अंजसउपसंख्यानं अंजसाकृतं आत्मनश्च तृतीयायाअलुक् पूरण
इतिवक्तव्यं पूरणप्रत्ययांतेउत्तरपदेइत्यर्थः आत्मनापंचमः वैयाकरणाख्या
यांचतुर्थ्याः आत्मनइत्येव आत्मनेपदं आत्मनेभाषाः परस्य परस्मैपदं पर
स्मैभाषाः हलदंतेति ङेरलुक् त्वचिसारः गवियुधिभ्यांस्थिरः स्त्यषः गविष्ठिरः
षर
सहसाकृतं अंभसाकृतं तमसाकृतं ५

दिविस्पृक अलुक॰

मध्य॰स॰ युधिष्ठिरः अरण्येतिलकः संज्ञायामितिसमासः हृद्युभ्यांच हृदिस्पृक् म मध्याहुतौ
२२ ध्येगुरुः अंताच अंतेगुरुः अमूर्द्धमस्तकात्स्वांगादकामे कंठेकालः उरसिलोमा
अमूर्द्धमस्तकात्किं मूर्द्धशिखः मस्तकशिखः अकामेकिं मुखकामः तत्पुरुषेकृति
बहुलं उरलुक् स्तंबेरमः कर्णेजपः कचित्न कुरुचरः शयवासवासिष्वकालात्
खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी षष्ठ्याआक्रोशे चौर
स्यकुलं आक्रोशेकिं ब्राह्मणकुलं वाग्दिक्पश्यद्भ्योयुक्तिदंडहरेषु वाचोयुक्तिः
दिशोदंडः पश्यतोहरः आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेतिच. देवानांप्रियइ
तिचमूर्खे अन्यत्रदेवप्रियः शेपपुच्छलांगुलेषुशुनः शुनःशेपः शुनःपुच्छः शुनोलां
गूलः दिवश्चदासे दिवोदासः ऋतोविद्यायोनिसंबंधेभ्यः होतुरंतेवासी पितुरंते
वासी विभाषास्वसृपत्योः ऋदंतात्षष्ठ्याः मातुःपितृभ्यामन्यतरस्यां आभ्यांस्वसुः
सस्यषःसमासे मातुःष्वसा पितुःष्वसा मातुःस्वसा पितुःस्वसा लुकपक्षेतु मा २२
तृपितृभ्यांस्वसा स्वसुःसस्यषः मातृष्वसा पितृष्वसा असमासेतु मातुःस्वसा पितुःस्वसा॰

श्रीः इत्यलुक्समासः घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषुङ्योनेकाचोह्रस्वः
भाषितपुंस्काद्घादीङीषः तरं तस्यानेकाचो ह्रस्वो घरूपकल्पप्रत्ययेषुपरेषुचेलडादिषू
त्तरपदेषु ब्राह्मणितरा ब्राह्मणितमा ब्राह्मणिचेली ब्राह्मणिब्रुवा ब्राह्मणिगोत्रेत्या
दि चेलीदीनिवृत्तिविषये कुत्सितवाचीनि तैः कुत्सितानिकुत्सनैरितिसमास इत्यादि
नद्याःशेषस्यान्यतरस्यां अड्यंतनद्याड्यंतेकाचश्च घादिषुह्रस्वोवा ब्रह्मबंधूतरा ब्रह्म
बंधुतरा स्त्रीतरा स्त्रितरा हन्नप्राप्त लक्ष्मीतरा उगितश्च विदुषितरा ह्रस्वाभाव
पक्षेपुंवत् विद्वत्तरा पादस्यपदाज्यातिगोपहतेषु एषूत्तरपदेषुपादस्यपदइत्यदंतादे
शः पादाभ्यामजतीतिपदाजिः पदातिः अज्यतिभ्यांपादेचेतिउणप्रत्ययः पदगः प
दोपहतः पद्यत्यतदर्थे पादस्यपतदर्थेयति पादौविध्यंतिपद्याःशर्कराः विध्यसध
नुषेतियत् अतदर्थेकिं पादार्थमुदकंपाद्यं पादार्घाभ्यांचेतियत् उदकस्योदःसंज्ञा
यां उदमेघः उत्तरपदस्यचेतिवक्तव्यं क्षीरोदः पेषंवासवाहनधिषुच उदपेषंपिनष्टि उ
दवासः उदवाहनः उदधिर्घटः एकहलादौपूरयितव्येन्यतरस्यां उदकुंभः उदककुं
भः एकेतिकिं उदकस्थाली पूरयितव्येकिं उदकपर्वतः मंथौदनसक्तुबिंदुवज्रभा

मध्य०स० रहारवीवधमाहेषु च उदमंथः उदकमंथः इको ह्रस्वोऽङ्योगालवस्य इगंतस्याङ्यंत
२२ स्य ह्रस्वो वा उत्तरपदे ग्रामणिपुत्रः ग्रामणीपुत्रः इकः किं रमापतिः अङ्यः किं गौरीप
तिः ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ष्यङंतस्य पूर्वपदस्य संप्रसारणं पुत्रपत्योः परतः
संप्रसारणस्य दीर्घः स्यादुत्तरपदे कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः कौमुदगंधीपतिः
इष्टकेषीकामालानां चिततूलभारिषु इष्टकादीनां तदंतानां च चितादिषु ह्रस्वः इष्टक
चितं पक्वेष्टकचितं इषीकतूलं मुंजेषीकतूलं मालभारी ज्योतिर्जनपदरात्रिनाभिना
मगोत्ररूपस्थानवर्णवयोवचनबंधुषु समानस्य सः सज्योतिः सजनपद इत्यादि तीर्थे ये
यादौ प्रत्यये विवक्षिते समानस्य सः सतीर्थ्यः एकगुरुकः समाने तीर्थे वासीति यत्प्रत्ययः
विभाषोदरे सोदर्यः समानोदर्यः दृग्दृशवतुषु समानस्य सः सदृक् सदृशः दृक्षे च
सदृक्षः इदंकिमोरीश्की दृग्दृशवतुषु ईदृक् ईदृशः कीदृक् कीदृशः दृक्षे च ईदृक्षः
न्य कीदृक्षः अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु
अन्यराशा अन्यत्छ्वस्य दुगागमः अन्यदाशीः अन्यदाशा अन्यदास्थितः अन्यदुत्सुकः अन्यदूतिः अ २३
न्यद्रागः अषष्ठीत्यादि किं अन्यस्यान्येन वा आशीरन्याशीः कारके छे च नायं निषेधः

अन्यस्य कारकोऽन्यत्कारकः अन्यस्यायमन्यदीयः अर्थे विभाषा अन्यदर्थः अन्यार्थः कोः
कत्तत्पुरुषेऽचि अजादावुत्तरपदे कुत्सितोऽश्वः कदश्वः कदन्नं तत्पुरुषे किं कूष्ट्रो राजा
त्रौ च कत्त्रयः रथवदयोश्च कद्रथः कद्वदः तृणे च जातौ कत्तृणं काप्यक्षयोः कापथं
काक्षः ईषदर्थे ईषज्जलं काजलं विभाषा पुरुषे कापुरुषः कुपुरुषः कवं चोष्णे वालाकार
कवोष्णं कोष्णं कदुष्णं पृषोदरादीनि यथोपदिष्टं पृषतः उदरं पृषोदरः तलोपः वारि
वाहकः बलाहकः पूर्वपदस्य बः उत्तरपदादेश्च लत्वं भवेद्वर्णागमाद्धंसः सिंहो वर्णवि
पर्ययात् गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरं १ मतौ बह्वचोऽनजिरादीनां दीर्घः
स्यात् अमरावती अनजिरादीनां किं अजिरवती ॥ संज्ञायामित्येव नेह वलयवती
शरादीनां च शरावती उपसर्गस्य घञ्यमनुष्ये बहुलं परीपाकः परिपाकः अमनु
ष्ये किं निषादः नरे संज्ञायां विश्वानरः मित्रे चर्षौ विश्वामित्रः शुनो दंतदंष्ट्राकर्ण
कुंदवराहपुच्छपदेषु दीर्घो वाच्यः श्वादंतः श्वानिरंतः शारस्कल्प श्वाश्र काष्ठे खदिरपीयू

मध्य०स० क्षाभ्योसंज्ञायामपि एभ्योवनस्यणत्वं प्रवणं निर्वणमित्यादि विभाषौषधिवनस्प
२४ तिभ्यः दूर्वावणं दूर्वावनं शिरीषवणं शिरीषवनं द्व्यच्त्र्यच्भ्यामेव नेह देवदारुवनं
को इरिकादिभ्यः प्रतिषेधोवाच्यः इरिकावणं इरिकावनं वाहनमाहितात् आरोहणमपि नं।मि०
यदुच्यते न द्व्यच्स्थानि निमित्ता द्वाहनस्यणः इक्षुवाहणं पानंदेशे पूर्वपदस्थान्निमि
त्तात्सरस्यपानस्यणः क्षीरपानं येषांते क्षीरपाणाः उशीनराः सुरापाणाः प्राच्याः वा
ण भावकरणयोः क्षीरपाणं क्षीरपानं प्रातिपदिकान्तनुम्विभक्तिषु च पूर्वपदस्थान्नि
मित्तात्सरस्यपुष्टितस्यनस्यणोवा माषवापिणौ व्रीहिवापाणि माषवापेणांपक्षे
माषवापिनावित्यादि कुमतिच कवर्गवत्युत्तरपदेप्रागवत् हरिकामिणौ हरिका
माणि हरिकामेण पदव्यवायेपि णत्वं न माषकुंभवापन अतद्धित इतिवाच्यं आ
ती र्द्रगोमयेण शुष्कगोमयेण पारस्करप्रभृतीनि च संज्ञायां एतानिसस्कृतानि निपात्यंते २४ नि
पारस्कराः किष्किंधा तद्बृहतोः करपत्योः चोर देवतयोः सुट् तलोपश्च

मध्य०स० तत्पूर्वस्यत्वेवद्कारोपिबोध्यः तद्बृहतोर्दकार तकारौलुप्येते करपत्योःसुट् स्कट्
२५ चोरदेवतयोरितिसमुदायोपाधिः तस्करः बृहस्पतिः प्रायस्याचित्तिचित्तयोः सुट् स्यात्
प्रायश्चित्तिः प्रायश्चित्तं वनस्पतिरित्यादि आकृतिगणोयं समासाश्रयविधिः

श्रीः अग्रेतद्धितप्रत्ययाः ॥ श्रीः ॥ श्रीः

श्रीः अब्द्यंकश्रृपशाके वैरनरेवाऊलमेरके समासपुस्तकमिदं सीताराम
मः समालिखत् १ श्रीः ॥

श्रीः केवलाधिकारपठितत्वं केवलत्वं अव्ययीभावाधिकारपठितत्वं अव्ययीभावत्वं तत्पुरुषाधि
कारपठितत्वं तत्पुरुषत्वं कर्मधारयाधिकारपठितत्वं कर्मधारयत्वं द्विग्वधिकारपठितत्वं द्विगुत्वं
बहुव्रीह्यधिकारपठितत्वं बहुव्रीहित्वं द्वंद्वाधिकारपठितत्वं द्वंद्वत्वं इतिसमासलक्षणं ० २५

मध्य०स
२५

श्रीः इतिमध्यकौमुद्यांतद्धितकारकसमासौसमाप्तौ श्रीः शुभंभवतु श्रीः

२५

नवाहः उक्थानि उक्थैर्नुशंसति उक्थशायजमानः उक्थशासौ पुरोडा
श्यतेदीयतेपुरोडाः अवयजः अवयाजौ अवयाजः अवयाश्वेतवाः पुरोडा
श्च एतेसंबद्धाः निपात्यंते चाउक्थशाः लिङर्थेलेट् सिब्बहुलंलेटि इतश्चलोपः
परस्मैपदेषु लेटस्लिङ्वा लेटोडाटौ स्तौवातौचपितौ सिब्बहुलंणिद्वक्त
व्यः हद्भिः प्रणआयूंषितारिषत् सुपेशसस्करति ज्योषिषद्धि आसाविष
दर्शसानाया सिपइलोपस्यनाभावे पतितातिद्दिकृतं प्रियःसूर्येप्रियो
अग्नापत्रवाति सनुत्तमस्य लेटउत्तमसस्यवालोपः करवाव करवावः
टेरेत्वं आतऐ लेट आकारस्य सुतेभिः सुप्रयसामादयंते आतामित्या
कारस्य ऐ वैतोन्यत्र लेटएकारस्य ऐस्याद्वा आन्तरैः इत्सस्यविपर्यायविना प
भूनामिवमीशे गृहागृह्यांते अन्यत्रकिं सुप्रयसामादयैते उपसंवादा
कर्योश्च पणबंधेआर्शी कायांचदेह् अहमेवपशूनामीशे नकिसा

मध्य॰ वै॰ यंतो नरकं पताम: व्यत्ययो बहुलं विकरणानां छंदसि आंडा शुष्णस्य भेदति
भिनत्तीति प्राप्ते जरसामरतपतिः म्रियत इति प्राप्ते इंद्रो वस्तेन नेषतु न
३६ यतेर्लोट् शप्सिपौ द्वौ विकरणौ इंद्रेण युजा तरुषेम वृत्रं तरेमेत्यर्थः तर
तेर्विध्यादौ लिङ् उः सिप् शप् चेति त्रयो विकरणाः सुप्तिङुपग्रहलिंगनरा
णां कालहलच्स्वरकर्तृयङां च व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिध्यति
बाहुलकेन धुरि दक्षिणायाः दक्षिणस्यामिति प्राप्ते चषालं ये अश्वयूपा
युतक्षति तक्षंतीति प्राप्ते उपग्रहः परस्मैपदात्मनेपदे ब्रह्मचारिणमि
च्छते इच्छतीति प्राप्ते प्रतीपमन्य ऊर्मिर्युध्यति युध्यत इति प्राप्ते म
धोस्तृण इवासते मधुन इति प्राप्ते नरः पुरुषः अधा स वीरैर्दशभिर्वि
यूयाः वियूयादिति प्राप्ते कालः कालवाचकाः प्रत्ययाः श्वोग्नीनाधास्य
मानेन श्वो यो विषये लङ् तमसो गा अदुक्षत् अधुक्षदिति प्राप्ते मि ३६

त्रवयंचस्तरयः मित्रावयमिति प्राप्ते सरस्वत्यय्युक्तवक्षमते कर्तृशब्दः
कारकमात्रपरः तथा तद्धानिनां कृत्तद्धितानां व्यत्ययः अन्नादाय अण्विषये अ
यङ्य यशब्दादारभ्य लिङ्याशिष्यङिति ङकारेण प्रत्याहारः तेषां व्यत्ययो भेदती
त्यादिरुक्त एव छंदस्युभयथा धात्वधिकारोक्तः प्रत्ययः सार्वधातुकार्धधा
तुकोभयसंज्ञः स्यात् वर्द्धं तु स्वा सु हृतयः वर्धयंत्वित्यर्थः आर्धधातुकत्वा
ण्णिलोपः विभ्रष्णिवरे सार्वधातुकत्वात् श्नुश्नभावश्च ऊ भुवोरातिमण्
तुमर्थे से सेन् से असे न्क्से कसेन् ध्यै अध्यैन् कध्यै कध्यैन् शध्यै शध्यैन् तवै तवेङ्
तवेन् सोवक्षेरायः सेन् तावामेष असे शरदो जीवसे धाः असेनि तु आकृ
दात्तः कसेन् गवामिव श्रियसे अध्यै अध्यैन् जठरं पृणध्यै आफ्रदात्तं कध्यै
कध्यैन् आहुवध्यै शध्यै सधर्मसः सहमादयध्यै शध्यैन् वायवे पिबध्यै त
वै दातवा उ तवेङ् सूतवे तवेन् कर्तवे प्रयै रोहिष्यै अव्यथिष्यै एते निपा

मध्य० वै यंते प्रयातुं रोढुं अव्यथियितुमित्यर्थः दृशे विख्येच निपात्यौ द्रष्टुं विख्यातु
मित्यर्थः कृत्यार्थे तवैकेन्केन्यत्वनः धातोरतेस्युः तवे अन्वेतवै केन्
३२ अवगाहे केन्या दिदृक्षेण्यः त्वन् कर्त्वं स्ापत्युदोःसुकमं पराक्रस्य
विस्रूपो विरप्शी पुराजत्यथ आत्वदः प्रकृत्यांतःपादमव्यपरे ऋक्पाद
मध्यस्थएङ्प्रकृत्यास्यात् नचु तु वकार यकारपरे अति उपप्रयतो अ
ध्वरं सुजाते अश्वसून्ते अंतःपादं किं एतास एतेचेति अव्यपरे किं तेऽ
वदन् अव्याद्वघाद्वक्रमुरप्रातायमवंस्तु वस्कपुरः एषुव्यपरेष्वितिएङः
प्रकृत्या वसुभिर्नो अव्यात् मित्रमहो अवधात् माशिवासो अवक्रमुः
तेनो अव्रता शतधारा अयंमणिः ते नो अवंतु कुशिकासो अवस्यवः ३२
सुपांसुलुक्पूर्वसवर्णाछेयाडाड्यायाजालः ऋजवः संतुपंथाः प
थानइतिप्राप्ते परमेव्योमन् व्योमनिइतिप्राप्ते धीती मती सुष्टुती

धीत्या मत्या सुष्टुत्येतिप्राप्ते पूर्वसवर्णः या सुरथा रथीतमा यौस्पु
रथाइतिप्राप्ते आ नना ब्राह्मणा नमामितिप्राप्ते आत् नयुष्मेवाज
बंधवः अस्मेइंद्राबृहस्पती युष्मास्फ अस्मभ्यं इतिप्राप्ते शे उरुयाध
ष्णुया उरुणाधृष्णुनेतिप्राप्ते या नभापृथिव्याः नाभावितिप्राप्ते डा
ता अनुष्ठ्योच्यावयतात् आडो ज्या साधुया साध्वितिप्राप्ते यात्
वसंतायजेत वसंते इतिप्राप्ते आत् इयाडियाजीकाराणामुपसंख्या
नं उर्विया उरुणेतिप्राप्ते इया सुक्षेत्रिया सुक्षेत्रिणेतिप्राप्ते डियाच्
दार्विंनथुक्के सरसीशयानं सरस्यामितिप्राप्ते ई अज्ञासेरसुक् ब्रास
णासः तन्वादीनां वेयङ्वङौ तनुं पुषेम तनुवं पुषेम विषुंपश्य
विषुवंपश्य स्वर्गो लोकः सुवर्गो लोकः त्र्यंबकं त्रियंबकं व

मध्यं॰वै रेण्यं वरेणियं अनोत्तिसत्पृस्त्र बकुल्कंछंदसि अग्निर्देवेभिः मंत्रे
ष्वाङ्ध्यादेरात्मनः आत्मन्शब्दस्यादेर्लोपः अडि त्मना देवेषु अ
३८ पोत्तिमासश्छंदसीतिवक्तव्यं माङ्गिरारङ्गिः प्रससुपोदः पादपूर
णे एषांद्वेस्तः प्रप्रायमग्निः संसमिध्यवसे उपोपमेपराम
श किंन्नोउउहर्षसे षष्ठ्याःपतिपुत्रपृष्ठपारपदपयःपोषेषु वि
सर्गस्यसस्स्यात् वाचस्पतिं विश्वकर्माणं दिवस्पुत्रायसूर्या
य दिवःस्पृष्टं धद्माणः स्तमसस्पारमस्य परिवीतइळस्प
दे दिविस्पयोदिधिषणाः रायस्पोषं यजमानेषु धत्तं इतिवैदि ३८

कप्रक्रिया श्रीः धातोः अंतउदात्तः अनुदा
त्तंपदमेकवर्जं परिभाषेयं स्वरविधिविषयास्मिन्पदेयस्योदा
त्तःस्वरितोवाविधीयते तमेकमचंवर्जयित्वाशेषं तत्पदमनु
दात्तात्कंस्यात् गोपायतंनः अत्रसनाद्यंताधातव इति
धातुत्वे धातुस्वरेणायकाराकार उदात्तः शिष्टमनुदात्तं उ
दात्तादनुदात्तस्यस्वरितः इतिनकाराकारःस्वरितः स्वरितात्सं
हितायामनुदात्तानां एकश्रुतिःस्यात् इतिनकाराकारः प्रच
यः अनुदात्तस्यचयत्रोदात्तलोपः यस्मिन्ननुदात्ते उदात्तोलुप्यते

मध्य॰ स्व॰ तस्योदात्तः देर्वीं वारं अत्र ङी बुदात्तः आकदात्तश्च प्रत्ययश्चाद्य
दात्तःस्यात् कर्त्तव्यं अनुदात्तौ सुप्पितौ पूर्वस्यापवादः यज्ञस्य नयो
३९ युक्षाति शप् तिपोरनुदात्तत्वे स्वरित त्वयोः सितः अंतउदात्तःस्यात्
चितःसप्रकृतेर्बह्वकजर्थं चितिप्रत्ययेसतिप्रकृतिप्रत्ययसमुदायसमुदा
यस्यांतोदात्ततावाच्येत्यर्थः नप्तांतामन्यकेसमे यकेसरस्वतीं तकत्
सातेतद्धितस्य चितस्तद्धितस्यांतउदात्तः पूर्वेणसिद्धेनित्स्वरबाध
नार्थं कौंजायनाः कितः कितस्तद्धितस्यांतउदात्तः यदाग्नेयः तित्स्वरितं
कृत्नूनं उपोत्तमं रिति रित्प्रत्ययांतस्योपोत्तममुदात्तंस्यात् यदाहवनी
ये त्रित्यादिर्नित्यं त्रिदंतस्यनिदंतस्य चादिरुदात्तः यस्मिन्विश्वानि ३९
पौंस्या पुंसःकर्माणि ब्राह्मणादित्वाष्यत्र सुतेदधिषनश्चनः चायतेर

मध्य॰ स्व॰ सुन्न चायेरन्ले दूस्वश्चेति चकाराद्धुनोनुडागमः लिति प्रत्ययात्पूर्वमुदा
त्तंस्यात् चिकीर्षकः अत्रईकारस्योदात्तता इत्यादिप्रयोगमनुसृत्या
४० न्वाख्यातव्यं इतिस्वरप्रक्रिया एषावरदराजेन बालाना
मुपकारिका अकारि पाणिनीयानांमध्यसिद्धांतकौमुदी १ कृतिर्वरद
राजस्यमध्यसिद्धांतकौमुदी तस्याःसंख्यातुविज्ञेयानवबाणाकरवह्नि
भिः ३५५९ इतिश्रीवादिटिकंरिवरदराजभट्टकृता मध्यसिद्धांत
कौमुदीसमाप्ता श्रीः संवत् २६९४

श्रीमद्दं विकार्पणं शुभमस्तुसर्वजगतः परिहितनिरताभ ४०
वंतुभूतगणाः दोषाःप्रयांतुनाशंसर्वत्रजनःसुखीभवतु श्रीरस्तु

767

श्रीः वेदांकषट्पौर्युजिनंदना रे शाके वसंते मधु कृष्णदशांमोदे
अभ्यास्यरामेणहि मध्यकौमुदीं बालोपक[illegible]लिखिता विकार्पणा